अन्यत्तु औशनसबार्हस्पत्यकामन्दकपञ्चतन्त्रनीतिमयूखहितोपदेशपाण्डवभारतीय-राजधर्मादौ द्रष्टव्यम् ॥

नीतिघोषः, पुं, ( नीतिरेव नीत्यात्मको वा घोषो रवो यस्येति । ) बृहस्पतिरथः । इति त्रिकाण्डशेषः ॥ (नीतेर्नयस्य घोषः ।) नयघ्वनिश्च ॥

नीतिसारः, पुं, ( नीतिरेव सारो यस्येति । ) इन्द्रं प्रति बृहस्पत्युक्तनीतिशास्त्रविशेषः । अयं पाण्डवसंग्रहनामकम् । गरुडपुराणे अष्टाध्यायेष्वस्ति । बाहुल्यभिया तत् समुदायं न लिखित्वा अष्टानामध्यायानां प्राथमिकाष्टश्लोका लिख्यन्ते । यथा,—

"सद्भिः सङ्गं प्रकुर्व्वीत सिद्धिकामः सदा नरः ।
नासद्भिरिह लोकाय परलोकाय वा हितम् ॥१॥
आपदर्थे धनं रक्षेद्दारान् रक्षेद्धनैरपि ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ २ ॥
यो ध्रुवाणि परित्यज्य अध्रुवाणि च सेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च ॥ ३ ॥
राज्यं पालयते नित्यं सत्यधर्म्मपरायणः ।
निर्ज्जित्य परसैन्यानि क्षितिं धर्म्मेण पालयेत् ॥४॥
भृत्या बहुविधा ज्ञेया उत्तमाधममध्यमाः ।
नियोक्तव्या यथार्थेषु त्रिविधेष्वेव कर्म्मसु ॥ ५ ॥
गुणवन्तं नियुञ्जीत गुणहीनं विवर्ज्जयेत् ।
पण्डिते च गुणाः सर्व्वे मूर्खे दोषाश्च केवलम् ॥६॥
न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
कारणादेव जायन्ते मित्राणि रिपवस्तथा ॥७॥
कुभार्य्याञ्च कुमित्रञ्च कुराजानं कुसौहृदम् ।
कुबन्धुञ्च कुदेशञ्च दूरतः परिवर्ज्जयेत् ॥"८॥
इति गारुडे ॥

नीथः, पुं, ( नयति प्रापयतीति । नी + "हनिकुषिनीरमिकाशिभ्यः क्थन् ।" उणां २ । २ । इति क्थन् । ) नियन्ता । प्रापयिता । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ ( नी + भावे क्थन् । नयनम् । इति उज्ज्वलदत्तः ॥ यथा, ऋग्वेदे । १ । १०० । १२ ।

"सहस्रचेताः शतनीथ ऋभ्वा ।"

स्तोत्रम् । यथा, ऋग्वेदे । ३ । १२ । ५ ।

"नीथाविदो जरितारः ।"

"नीथाविदस्तोत्राभिज्ञाः ।" इति तद्भाष्ये सायनः ॥ )

जले, क्ली । इति संक्षिप्तसारोणादिवृत्तिः ॥ ( नीयतेऽनेनेति । करणे + क्थन् । प्रापणहेतुभूते, त्रि । यथा, ऋग्वेदे । १ । १०४ । ५ ।

"प्र भि यत्स्या नीथादर्शि ॥"

"यद्यदा नीथा नयनहेतुभूता स्या सा पदवी प्रत्यदर्शि ।" इति तद्भाष्ये सायनः ॥)

नीध्रं, क्ली, ( नितरां ध्रियत इति । नि + धृ + मूलविभुजादित्वात् कः । ) वलीकम् । वनम् । नेमिः । चन्द्रः । रेवतीनक्षत्रम् । इति हेमचन्द्रः ॥ नीव्रमपि पाठः ॥

नीपः, पुं, (नी + "पानीविषिभ्यः पः ।" उणां ३ । २३ । इति पः । बाहुलकात् गुणाभावः । ) कदम्बवृक्षः । इत्यमरः । २ । ४ । ४२ ॥ ( यथा, ऋतुसंहारे । ३ । १९ ।

"नवजलकणसेकादुद्गतां रोमराजीं
ललितमिव दधाना ..." )

— [The printed text reads:]

"अभ्रा कदम्बकूटजार्ज्जुनसर्ज्जनीपान्
सप्तच्छदानुपगता कुसुमोद्गमश्रीः ॥"

क्वचित् क्ली । यथा,—

"नीपं सभार्गकं पीलु तृणशून्यं विकङ्कतम् ।
प्राचीनामलकञ्चैव दोषघ्नं गरहारि च ॥"

इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ॥

"गरदोषहरं नीपं प्राचीनामलकं तथा ॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

धाराकदम्बः । इति राजनिर्घण्टः ॥ बन्धूकवृक्षः । नीलाशोकवृक्षः । इति मेदिनी । पे, ८ ॥

नीयमानं, त्रि, ( नीयते इति । नी + कर्म्मणि शानच् । ) प्राप्यमाणम् । यथा, कालिकापुराणे ।

"नीयमानो न गच्छेच्च व्याहिषीमरथं तदा ॥"

नीरं, क्ली, ( नयति प्रापयति स्थानात् स्थानान्तरमिति । नी प्रापणे + "स्फायितञ्चीति ।" उणां २ । १३ । इति रक् । यद्वा, "अपो रापः ।" इति श्रुतेः निर्गतं रादपेदिति, "अङ्गोऽपि बैकल्यः पत्तम् ।" इति स्मृतेः निर्गतो रोऽग्नियस्मादिति वा । "ढ्रलोपे पूर्व्वस्य दीर्घोऽणः ।" ६ । ३।१११। इति रलोपे पूर्व्वदीर्घः । ) जलम् । इत्यमरः ।१।१०।४॥ ( यथा, गीतगोविन्दे ।१।६।

"छलयसि विक्रमणे बलिमद्भुतवामन
पदनखनीरजनितजनपावन ।
केशव धृतवामनरूप
जय जगदीश हरे ।" )

रसः । इत्युणादिकोषः ॥ नीरे अवश्यपेयानि यथा, गरुडपुराणे ।

"निष्ठीवाद्यङ्कुष्ठनकूलविवाणमसु न संक्षिपेत् ॥"

( अस्य पानविधेयता विधीयते यथा,—

"वाग्युद्धवन्तत् प्रवदन्ति धीरा
नीरं समासेन निगद्यतेऽत्र ।
यत् श्रीमताञ्चैव महायतीनां
बलप्रदं पथ्यतरं प्रदिष्टम् ॥"

"विश्रम्भे तृणनीलिका विश्रुतं तन्मे वनं पिच्छिलं दन्तग्राह्यमनार्त्तवं हि सलिलं दुर्गन्धि वै गर्हितम् ।
नानाजीवविमिश्रितं गुरुतरं पर्णौघपङ्काविलं चन्द्रार्कांशुसुगोपितं न च पिबेन्नीरं सदोषान्वितम् ॥"

इति हारीते प्रथमस्थाने सप्तमेऽध्याये ॥ )

नीरजं, क्ली, ( नीरे जले जायते इति । जन + डः ।) कुष्ठौषधिः । ( यथा, सुश्रुते चिकित्सितस्थाने । २५ ।

"पत्तङ्गं लौहरजोऽञ्जनञ्च
यष्ट्याह्वयं नीरजसारिवे च ।" )

पद्मम् । इति मेदिनी । जे, २४ ॥ ( यथा, अमरुशतके । ४ ।

"नीतं जन्म नवीननीरजवने पीतं मधु स्वेच्छया ।")

मुक्ता । इति राजनिर्घण्टः ॥ जलजाते, त्रि ॥

नीरजः, पुं, ( नीरे जायते इति । जन + डः । ) उद्रवनम्ब्रुः । इति शब्दरत्नावली ॥ उशीरी । इति राजनिर्घण्टः ॥ (महादेवः । यथा, महाभारते । १३ । १७ । १४६ ।

"उद्भिच्चिविक्रमो वैद्यो विरजो नीरजोऽमरः ॥")

नीरजः, [स्] त्रि, ( निर्नास्ति रजो धूलिः कुसुमपरागादिर्वा यत्र ।) निर्धूलिदेशपुष्पादि । (यथा, महाभारते । १३ । ८१ । २० ।

"सर्व्वा मणिमयी भूमिः सर्व्वकाञ्चनवालुका ।
सर्व्वर्त्तुसुखसंस्पर्शा निष्पङ्का नीरजाः शुभा ॥")

अरजस्कायाम् स्त्री ॥

नीरतः, त्रि, ( निर्गतं रतं रमणं यस्मात् । ) विरतः । रमणाभाववान् । यथा,—

"दिशि दिशि नीरतरङ्गो नीरतरङ्गो ममापि हृदयेशः ।
आजाताः सखि वर्षा वर्षादपि याम्य वासरो दीर्घः ॥"

इत्युद्भटदर्पणम् ॥

नीरदः, पुं, ( नीरं जलं ददातीति । नीर + दा + कः । ) मेघः । यथाह घटकर्परः ।

"निचितं खमुपेत्य नीरदैः प्रियहीना हृदयावनीरदैः ।"

मुस्तकम् । इति राजनिर्घण्टः ॥ ( निर्गताः रदो दन्तो यस्य । ) रदशून्ये, त्रि ॥ यथा,—

"आस्वाद निरवशेषं विरहिवधूनां मदूनि मांसानि ।
करकामिषेण मन्ये निष्ठीवति नीरदोऽस्थीनि ॥"

इत्युद्भटः ॥

नीरधिः, पुं, (नीराणि धीयन्तेऽस्मिन्निति । नीर + धा + "कर्म्मण्यधिकरणे च ।" ३ । ३ । ९३ । इति किः । ) समुद्रः । इति शब्दरत्नावली ॥

नीरनिधिः, पुं, (नीराणि निधीयन्तेऽत्रेति । नीर + नि + धा + किः । ) समुद्रः । इति शब्दरत्नावली ॥ ( यथा, माघे । ३ । ७० ।

"पारे जलं नीरनिधेरपश्यन्
मुरारिरानीलपलाशराशीः ॥")

नीरन्ध्रं, त्रि, ( निर्नास्ति रन्ध्रं छिद्रं यस्मिन् । ) घनम् । इति हेमचन्द्रः । ६ । ८३ ॥ ( यथा, माघे । ८ । ९ ।

"नीरन्ध्रद्रुमशिशिरां भुवं व्रजन्तीः
साशङ्कं मुहुरिव कौतुकात् करेणः ।
यस्याङ्गं चलमलिनाकुलीलतानां
शाखानामनुहिनरश्मिरस्पृशत् ॥" )

छिद्ररहितम् । यथा,—

"श्रीमन्नाथ तवार्जितोर्ज्जितयशःसंघहंसावलीमादायैव विधिर्व्विधितुमरमलं हारं तदीयैर्गुणैः ।
नीरन्ध्रामवलोक्य तामपि ततो नान्तं गुणानामहो
उत्पित्सुर्मरुदम्बरे धवलिततारकाचन्द्रकाः ॥"

इति कालिदासः ॥